प्रतिदत्तभिन्ने “अपमित्यमप्रतीत्तं यदस्मि यमस्य, येन बलिना चरामि” इति अथर्ववेदः ६,११७,१,

**अप्रतीप** त्रि० विरोधे न०त० । प्रतीपभिन्ने अनुकूले ।

**अप्रत्यय** पु० न प्रत्ययः विश्वासो ज्ञानं वा अभावे न०त० । १विश्वासाभावे “दोषाणां सन्निधानं कपटशतमयं क्षेत्रमप्रत्ययानामिति” सिह्लनः न०ब० ।२ विश्वासशून्ये । “बलवदपि शिक्षितानामात्मन्यप्रत्ययं चेतः” शकु० । ३ज्ञानाभावे पु० । न०ब० । ४ज्ञानशून्ये त्रि० । प्रत्ययः-प्रकृतिनिमित्तकः अर्थबोधकः सुबादिशब्दभेदः न०त० । ५सुबादिशब्दभिन्ने सार्थके प्रकृतिरूपे शब्दे “अर्थवदधातुरप्रत्ययः प्रातिपदिकमिति” पा० ।

**अप्रत्याख्येय** त्रि० न०त० । अपरिहार्य्ये त्यक्तुमशक्ये ।

**अप्रधान** न० न प्रधानम् । १प्रधानभिन्ने मुख्यभिन्ने गौणे । “प्रधानकर्म्मण्याख्येये लादीनाहुर्द्विकर्म्मणाम् अप्रधाने दुहादीनां ण्यन्ते कर्त्तुश्च कर्म्मणः” हरिः कर्म्मणोऽप्रधानत्वञ्च अप्रधानक्रियाफलाश्रयत्वम् । “प्राधान्यं हि विधेयत्र प्रतिषेधेऽप्रधानतेति” भाट्टाः२अनुत्कृष्टे अस्य त्रिलिङ्गत्वमपीष्यते । “अप्रधानः प्रधानः स्यात् सेवते यदि पार्थिवम् । प्रधानोऽप्यप्रधानः स्याद्यदि सेवाविवर्जितः” नीति० ।३ प्रधानकर्म्माङ्गे न० “अप्रधानकालं सकृदसन्निपातात्” कात्या० १,७,१५, अयमर्थः । ‘वसन्ते ब्राह्मणोऽग्नीनादधीतेत्यनारभ्याधीतमप्याधानमग्निहोत्रादीनामङ्गमिति कृत्वा चिन्त्यते किमङ्गं सत् आधानं प्रतिकर्म प्रतिप्रयोगं च भेदेन कर्त्तव्यम् उत सर्व्वप्रयोगाणां साधारणं सकृदिति । तत्र कर्म्माङ्गत्वे प्रयाजाद्यङ्गवत् प्रतिकर्मभेदेन कर्त्तव्यम् न च वहिःकालत्वेनाग्न्यहप्रमाणविशेषता, यद्दृयस्यानन्तरं क्रियते तत्तदर्थमित्यानन्तर्य्येण विशेषग्रहणात् । तस्मात् प्रतिकर्मभेदेनाधानप्राप्ताविदमुच्यते अप्रधानकालं यदङ्गमाधानसदृशम् तत्सकृदेव कर्त्तव्यम् न भेदेन कर्मण आदौ । कुतः ? असंनिपातात् न चैतत् कस्यचित् कर्मणः प्रक्रमे कर्ममध्ये वा संनिपतितम् येन विशेषग्रहणं स्यात् किन्तु यदेव किञ्चिदग्निकार्य्यं निमित्तवशात्कामवशाद्वा यथाकामं प्राप्तम् तदर्थमाधास्येऽग्नीनिति, न तु कञ्चिदेव कर्मविशेषमभिसंधायाधानम् एवमनभिसंहितकर्मविशेषेण सर्वोद्देशेनाधाने कृते यद्यपि कारणवशात् किञ्चित् कर्म प्रथममापतति तथापि न तादर्थ्यमेव भवति प्रथमावस्थायामेव सर्वार्थत्वावधारणात् तस्मात् अप्रधानकालीनत्वात् सकृदेव कार्य्यमिति” कात्या०व्या० ।

**अप्रधृष्य** त्रि० न प्रधर्षितुं शक्यः । १अतिक्रान्तुमशक्ये २धर्षितुमशक्ये च । “यदाश्रौषं भीष्ममत्यन्तशूरं हतं पार्थेनाहवेष्वप्रधृष्यम्” भा०आ०प० ।

**अप्रपन्न** त्रि० न०त० । १प्राप्तभिन्ने, २अनागते, ३अज्ञाते च

**अप्रबल** त्रि० न प्रबलः । प्रबलभिन्ने हीनबले ।

**अप्रभाव** पु० न प्रभावः अभावे न०त० । १ प्रभावाभावे न०ब० । २ प्रभावशून्ये त्रि० ।

**अप्रभूत** त्रि० न प्रभूतः न०त० । प्रचुरभिन्ने स्वल्पे ।

**अप्रमत्त** त्रि० प्र+मद—क्त प्रमादवान् विरोधे न०त० । सावधाने “निमित्तेषु च सर्व्वेषु अप्रमत्तोभवेन्नर” इति स्मृतिः । “यतात्मनोऽप्रमत्तस्य द्वादशाहमभोजनम्” “युक्तश्चैवाप्रमत्तश्च परिरक्षेदिमाः प्रजाः” इति च मनुः २ विष्णौ पु० “अपां निधिरधिष्ठानमप्रमत्तोऽप्रतिष्ठितः” विष्णुसह० “अप्रमत्तोऽधिकारिभ्यः कर्म्मानुरूपं फलं यच्छन्नप्रमत्तः” इति भा० । २ मद्यादिना प्रमत्तभिन्ने त्रि० ।

**अप्रमय** पु० न प्रमीयते प्र+मि—अच् वेदे नात्त्वम् । अप्रमेये “मनसैवानुद्रष्टव्यमेतदप्रमयं ध्रुवम्” शत० ब्रा० “अप्रमयमप्रमेयम्” भा० ।

**अप्रमाण** न० न प्रमाणं विरोधे न० । प्रमाज्ञानभिन्नभ्रमादिजनके वाक्यादौ । तानि च “वेदाः प्रमाणं स्मृतयः प्रमाणं धर्मार्थयुक्तं वचनं प्रमाणम् । यस्य प्रमाणं न भवेत् प्रमाणं कस्तस्य कुर्य्याद्वचनं प्रमाणमिति” स्मृत्युक्तवेदादिप्रमाणभिन्नानि चार्वाकादिवचनानि “नद्यां शिलाः तरन्तीत्यादीनि प्रमाणान्तरविरुद्धार्थकानि वचनानि” च । एवं पित्तादिदुष्टानि इन्द्रियाणि आभासकलितानि लिङ्गानि च । “प्रमाणत्वाप्रमाणत्वे” इत्यादि मीमांसा ।

**अप्रमाद** पु० न प्रमादः अभावार्थे न०त० ।१ प्रमादाभावे “अप्रमादेन गन्तव्यं कान्तारेषु नदीषु च” इति “अप्रमादश्च कर्त्तव्यः सर्व्वभूतेषु नित्यशः” इति च रामा० । न०ब० २प्रमादशून्ये त्रि० “माता च मम कौशल्या । कुशलं चाभिवादयन् । अप्रमादं च वक्तव्यमिति” रामा० “प्रमादश्च कर्त्तव्येषु अकर्त्तव्यत्वभ्रमेण ततोनिवृत्तिः । अकर्त्तव्येषु च कर्त्तव्यत्वभ्रमेण तत्र प्रवृत्तिरिति” मञ्जूषादयः । [प्रमादहीने स्त्रियां ङीप् ।

**अप्रमादिन्** त्रि० न प्रमाद्यति प्र+मद—णिनि न०त० ।

**अप्रमायुक** त्रि० प्र+मि+उण् आत्त्वे युच् स्वार्थे कन् न०त० । अपरिच्छेदके । “कृणोत्वप्रमायुकं रथयुतिमनागसम्” अथ० १८,४४,२ ।